# असमराज्यस्य
# संस्कृतशैक्षिकसमस्या : निदानम् उपचारः परामर्शः च

डॉ.अपूर्वशर्मा
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
nipazu1987@gmail.com

## उपोद्घातः

शिक्षा निरन्तरं प्रवाहमाना काचित् प्रक्रिया अस्ति। शिक्षाप्राप्तौ अस्मिन् जगति मानवः एव समर्थः अस्ति इत्यतः मानवः शिक्षया जीवश्रेष्ठत्वं प्राप्नोति। मानवं विना एतत् जगत् अविकसितम् अन्धकारमयं च अभविष्यत्। मानवस्य श्रेष्ठत्वस्य कारणं तु शिक्षा एव। मानवः अनुसन्धित्सुः इत्यतः सर्वदा नित्यनूतनसामग्रीणां प्रस्तुतीकरणे संलग्नः अस्ति। खगोलस्य "संकर्षण" (Big Bang) आन्दोलनस्य फलतः ग्रहाणां समुत्पत्तिः तथा एव अस्याः धरायाः च समुद्भवः। क्षिति-अप्-तेजो-मरुत्-व्योम्नां सम्मिश्रणरूपे जगति मानवानाम् उत्पत्तिः दीर्घकालानन्तरम् एव इति जीवतत्त्वविद्भिः कल्प्यते। पृथिव्याः उत्पत्तिविषये विश्वस्य सर्वप्राचीनग्रन्थस्य ऋग्वेदस्य दशममण्डलस्य नासदीयसूक्ते प्रतिपादितम् अस्ति एवम् –

**नासदासीन्नोसदासीत्तदानीं नासीद्रजो नो व्योमापरो यत्।**
**किमावरीवः ! कूह कस्य शमन्नम्भः किमासीद गहनं गम्भीरम्॥**[1]

एतत् सर्वम् अपि दैवदत्तम् एव, किन्तु एतादृशं यत् ज्ञानं तत् तु मनुजानाम् अनुसन्धित्सुमनसः फलम् एव इति। मनसि अनुसन्धित्सा न अस्ति चेत् किम् अपि ज्ञानं नैव प्राप्यते। मनसि जिज्ञासा अस्ति कारणात् एव कश्चित् अपि कठिनात् अपि कठिनतरं विषयम् आत्मसात्कर्तुं प्रभवति।

समाजे परिदृश्यमानानां सर्वासां समस्यानां परिहाराय शिक्षा एकः एव प्रकृष्टः उपायः। यस्य राष्ट्रस्य शिक्षाव्यवस्था यथा सुव्यवस्थिता सुदृढा सुनिश्चिता च तस्य राष्ट्रस्य मानवः तथा एव विकसितः उत्कृष्टः च। यदि शिक्षा न व्यवस्थिता न सुनिश्चिता तर्हि जनः अविकसितः राष्ट्रम् अविकसितं वा भवति। तदर्थं शिक्षा व्यवस्थिता भवेत्, किञ्च आवश्यकतायाः अनुगुणं पाठ्यचर्यायां परिवर्तनम् आवश्यकं भवति। भारतीया शिक्षाव्यवस्था यद्यपि विश्वस्य इतरदेशीयाभिः शिक्षाव्यवस्थाभिः साकं समन्वयं स्थापयितुं पाठ्यक्रमाणां निर्माणं करोति तथापि अत्र पाठ्यक्रमेषु शिक्षाव्यवस्थासु च बहुविधाः समस्याः सम्भवन्ति। राज्यस्तरे अपि विभिन्नाः समस्याः सन्ति, येषां समाधानाय प्रयासः करणीयः भवति इति एवं विचिन्त्य अनुसन्धाता अत्र स्वीकृतस्य अध्ययनस्य समस्यात्वेन **असमराज्यस्थ-संस्कृत-शैक्षिक-समस्यानां निदानात्मकम् अध्ययनम्** इति विषयं स्वीकरोति।

## असमराज्यस्य संस्कृतशिक्षायाः इतिहासः

संस्कृतेन साकम् असमराज्यस्य महान् सम्बन्धः अस्ति। विशेषतः ज्योतिषशास्त्रेण सह महतः सम्बन्धस्य विषये असमराज्यस्य प्राचीननाम्ना एव ज्ञायते। असमराज्यस्य प्राचीनं नाम 'प्राग्ज्योतिष्पूरम्' इति आसीत्। कालिकापुराणस्य संरचना दशमशतिकायाम् अस्मिन् एव प्रान्ते सञ्जाता। अत्र एव कामाख्यामन्दिरस्य निर्माणस्य वर्णना प्राप्यते। अत्र अष्टनवतिः अध्यायाः तथा च नवसहस्रं श्लोकाः सन्ति। संस्कृतभाषायाः चर्चायाः विषये प्राप्ताः शिलालिपयः एव प्रमाणीभूताः। तत्र भास्करवर्मणः शिलालिपयः अपि सन्ति, याः संस्कृतभाषायाः तत्कालीनस्थितिं समीचीनतया दर्शयन्ति।

असमराज्ये अपि गुरुकुलशिक्षाव्यवस्था प्रचलिता आसीत् इति महापुरुषस्य श्रीमतः शङ्करदेवस्य जीवनचरितात् ज्ञायते। एषः महापुरुषः 'माधवकन्दली' इति नाम्नः गुरोः सविधे अध्ययनं कृतवान्। संस्कृतभाषायां निष्णातः एषः महापुरुषः गुरुकुले पठनस्य समये एव प्रथमं व्यञ्जनवर्णान् अधीत्य एव मात्राविहीनं पद्यं भगवतः विष्णोः स्तुतये अरचयत्। तत् एवं –

***करतल कमल कमल-दल नयन।***

1. ऋ. 10.129.1.

***भवदव दहन गहन वन शयन ।***
***नपर नपर पर सतरत गमय ।***
***सभय मभय भय ममहर सततय ।***
***खरतर वरशत हत दश वदन ।***
***खगचर नगधर फनधर शयन ।***
***जगदघ मपहर भवभय तरण ।***
***परपद लय कर कमलज नयन ।***[2]

यद्यपि अत्र संस्कृतविभक्तीनां प्रयोगः न दृश्यते तथापि एतेन ज्ञायते बाल्यकाले एव तेन निश्चयेन शास्त्राणि अधीतानि । प्राचीनायाः असमीयाभाषायाः स्वरूपम् अपि एवम् एव आसीत् ।

माधवकन्दली चतुर्दशशतिकायाः कछारीनृपतेः महामाणिक्यस्य राजसभायाः एकः प्रसिद्धः कविः आसीत् । माधवकन्दली चतुर्दशशतिकायां वाल्मीकिरामायणस्य अनुवादम् अकरोत् । सः हिन्दुधर्मे दीक्षितस्य राज्ञः महामाणिक्यस्य अनुरोधात् असमीयाभाषां प्रति वाल्मीकिरामायणस्य अनुवादम् अकरोत् । ततः परम् एव पञ्चदशशतिकायाः द्वितीयार्धे कृत्तिवासीरामायणं तथा च षोडशशतिकायाः अष्टमे दशके तुलसीदासस्य 'रामचरित मानस' इति उत्तरभारते प्रसारितम् ।

यदा महापुरुषेण माधवकन्दलिना विरचितस्य रामायणस्य काण्डद्वयं नष्टं जातं, तदा शङ्करदेवेन तथा च माधवदेवेन संस्कृतात् पुनः अनुद्य माधवकन्दलीरामायणे योजितम् । महापुरुषेण शङ्करदेवेन असमीयाभाषया (ब्रजावलीभाषया) रचितानि नाटकानि गीतानि च संस्कृतग्रन्थेभ्यः एव स्वीकृतानि । तेषु 'कालियादमन', 'केलिगोपाल', 'रुक्मिणीहरण', 'पारिजातहरण', 'रामविजय' च इत्यादीनि नाटकानि प्रमुखाणि । श्रीमद्भागवत्पुराणे वर्णितानां कथानाम् आधारेण 'कीर्तन' तथा च 'गुणमाला' इति ग्रन्थद्वयं पद्यरूपेण असमीयाभाषया तेन लिखितम् । एतेन ज्ञायते प्राचीनकाले असमराज्ये संस्कृतस्य बहुचर्चा अस्ति स्म इति ।

प्राचीनपद्धतिविशेषेण शिक्षिताः बहवः पण्डिताः आसन् ये संस्कृतविद्वांसः आसन्, तेषु विद्वत्सु महामहोपाध्यायस्य धीरेश्वराचार्यस्य नाम प्रथमम् आयाति यः 'वृत्तमञ्जरी' इत्याख्यं ग्रन्थं विरचितवान् । छन्दोविषयकम् इदं पुस्तकम् ।

भवदेवभागवती नामधेयः संस्कृतपण्डितः अपि संस्कृतभाषायां कतिपयान् ग्रन्थान् लिखितवान् । तस्य 'जयमतीकाव्यम्' इति खण्डकाव्यं सुप्रसिद्धम् अस्ति । भवदेवेन विरचितः अपरः पद्यग्रन्थः 'श्लोकमाला' इति ।

आचार्यमनोरञ्जनशास्त्री अपि संस्कृतक्षेत्रे सुप्रसिद्धः अस्ति । तेन लिखिताः ग्रन्थाः यथा – केतकीकाव्यम् (अनुवादकाव्यम्), पताकाम्नायः (शास्त्रकाव्यम्), उतङ्कभैक्ष्यम् (दृश्यकाव्यम्), प्रकामकामरूपम् (खण्डकाव्यम्) च ।
विपिनचन्द्रगोस्वामी अपि सुप्रसिद्धः संस्कृतज्ञः । 'नवमल्लिका' इति असमीयाकाव्यस्य तेन संस्कृतभाषायाम् अनुवादः कृतः ।

आधुनिकशिक्षायाः माध्यमेन शिक्षितानां संस्कृत-पण्डितानां मध्ये आनन्दरामबरुवाः सुप्रसिद्धः । महावीरचरितनाटकस्य उपरि जानकीरामभाष्यं तेन लिखितम् । तेन आङ्ग्लभाषायाम् अपि संस्कृतविषयकग्रन्थाः विरचिताः । तेन आङ्ग्लसंस्कृताभिधानम् अपि निर्मितम् ।

प्राच्यविद्यार्णवकृष्णकान्तसन्दिकै अपि संस्कृतपण्डितः आसीत् । तेन आङ्ग्लभाषायां संस्कृतग्रन्थस्य अनुवादः कृतः । कविना श्रीहर्षेण विरचितस्य नैषधचरितकाव्यस्य आङ्ग्लभाषानुवादः अतीव प्रसिद्धः ।

ड.योगीराजबसु महोदयः अपि अन्यतमः आसीत् । पश्चात् भगवान्-चन्द्र-गोस्वामी, आचार्यरजनीकान्त-देवशर्मा, अध्यापकः विनन्दचन्द्रवर्मन् महोदयाः उल्लेखनीयाः विद्यन्ते ।

ड.विश्वनारायणशास्त्री अपि आधुनिकपण्डितेषु सुप्रसिद्धः । तस्य संस्कृतभाषायां विरचितः उपन्यासः 'अविनाशि' इति ।

2. https://as.m.wikipedia.org

ड.मुकुन्दमाधवशर्मा असमराज्यस्य संस्कृतपण्डितः आसीत् । 'व्यञ्जनाप्रपञ्च-समीक्षा' इति अस्य संस्कृतभाषायां लिखितः ग्रन्थः अस्ति । एवम् एव असमराज्ये संस्कृतस्य महत्सु विद्वत्सु विराजमानाः सन्ति साम्प्रतम् अपि केचन ये स्वज्ञानगरिम्नः द्वारा असमराज्ये संस्कृतस्य प्रचाराय प्रसाराय कार्यं कुर्वन्तः सन्ति ।

संस्कृतपठनपाठनपरम्परा आधुनिके काले अपि असमराज्ये प्रचलिता अस्ति । एतस्याः परम्परायाः विषये प्रस्तुततथ्यानि विषयम् एतं दृढयन्ति ।

पाणिनिव्याकरणम् अनुसृत्य महामहोपध्याय-पुरोषोत्तमविद्यावागीशवर्यैः 'प्रयोगरत्नमाला' इति व्याकरणस्य निर्माणं कृतम् । ख्रीष्टाब्द-सप्तदशशतिकायां वैकुण्ठनाथभगवद्भट्टाचार्यवर्यः (भट्टदेवः) भगवद्गीतां भागवतं च गद्यात्मकम् अकरोत् ।[3]

विभिन्नेषु ग्रन्थेषु प्रतिवेदनेषु तथा च असमस्य इतिहाससम्बद्धेषु ग्रन्थेषु असमराज्यस्य संस्कृतशिक्षायाः सन्दर्भे प्राप्ताः विषयाः अत्र उल्लिखिताः ।

## असमराज्यस्य संस्कृतशिक्षणव्यवस्था

१८३४ अब्दे असमराज्ये जिल्लाविद्यालयानां स्थापना कृता, यत्र मेकाले प्रतिवेदनानन्तरं पाठ्यक्रमे संस्कृतम् अपि अन्तर्भुक्तम् । परं संस्कृतस्य अपव्यवहारं दृष्ट्वा तथा च संस्कृतं प्रति सर्वकारस्य अनिच्छाम् अवलोक्य केचन संस्कृतपण्डिताः 'सिलघाट्' इत्यस्मिन् मण्डले (अधुना बाङ्ग्लादेशे) 'संस्कृतटोल' (संस्कृतपाठशाला) इत्यस्य स्थापनां कृतवन्तः ।

१९२३ आङ्ग्लाब्दे असमसर्वकारेण 'श्रीहट्ट' इति स्थाने संस्कृतमहाविद्यालयस्य स्थापना कृता । अस्य पाठ्यक्रमं 'बङ्गीयसंस्कृतबोर्ड' निर्धारयति स्म । पश्चात् १९२६ अब्दे श्रीहट्टे असमसंस्कृतबोर्ड इत्यस्य स्थापना कृता । एतस्य स्थापनस्य अनन्तरम् 'असमसंस्कृतबोर्ड' एव संस्कृतशिक्षायाः पाठ्यक्रमस्य निर्धारणं संस्कृतपाठशालानां कृते करोति स्म तथा च परीक्षादीनां व्यवस्थां कृत्वा उपाधिप्रदानं करोति स्म । पाठ्यक्रमे संस्कृतव्याकरणं (प्रयोगरत्नमालाव्याकरणम्), साहित्यं, दर्शनं, नव्यन्यायः, धर्मशास्त्रं, ज्योतिषः च इत्यादीनां सन्निवेशः आसीत् ।

१९३८ अब्दे नलबारि इति स्थाने संस्कृतमहाविद्यालयस्य स्थापना कृता । एषः महाविद्यालयः असमसंस्कृतबोर्ड इत्यस्य अधीने अस्ति । अधुना एषः महाविद्यालयः स्नातकोपाधिप्रदानमहाविद्यालयत्वेन अस्ति ।

१९७० आङ्ग्लाब्दे गुवाहाटीनगरे असमसर्वकारेण असमसंस्कृतमहाविद्यालयस्य स्थापना कृता । अधुना अयं महाविद्यालयः कृष्णकान्तसन्दिकै-सर्वकारीय-संस्कृतमहाविद्यालयः इति नाम्ना प्रसिद्धः अस्ति ।

२०११ आङ्ग्लाब्दस्य मई-मासस्य २४ दिनाङ्कस्य असमसर्वकारस्य अधिसूचनानुसारं कुमारभास्करवर्मा संस्कृत-प्राचीन-अध्ययन-विश्वविद्यालयस्य स्थापना कृता ।[4]

संस्कृतशिक्षकाणां कृते प्रशिक्षणस्य व्यवस्था न अस्ति, न तु पाठ्यक्रमस्य मनोवैज्ञानिकतायै प्रयासः अस्ति । शिक्षणप्रक्रियायां पाठ्यपुस्तकं मुख्यं साधनं भवति । अध्यापकस्य यत् अध्यापनं अस्ति तस्य सीमानं पाठ्यपुस्तकम् एव निर्णयति । अत एव एवम् उक्तं यत् पाठ्यपुस्तकम् अध्यापकस्य साम्राज्यम् इति । पाठ्यपुस्तकं न केवलं शिक्षकान् परन्तु छात्रान् अपि महदुपकरोति । छात्राणाम् आकांक्षाणाम् अभिरुचीनाम् अनुगुणं मनोवैज्ञानिकपद्धत्या पाठ्यपुस्तकं निर्मातव्यं भवति । तदेव तेषाम् अभ्यस्तविषयाणां पुनःस्मरणाय, बौद्धिकविकासाय च अत्यन्तम् उपकरोति । समीचीनपुस्तकानाम् अभावे अध्यापकाः छात्राः च क्लेशम् अनुभवन्ति । असमराज्यस्य संस्कृतशिक्षाव्यवस्थायाः अध्ययनेन बह्व्यः समस्याः सम्प्राप्ताः, याः असमराज्ये संस्कृतशिक्षां नित्यं प्रभावयन्ति । सतीषु अपि बह्वीषु समस्यासु न्यादर्शदृष्ट्या जनानां साक्षात्कारेण प्रश्नावल्याः माध्यमेन सर्वेक्षणस्य अनुभवेन च प्राप्तानां कासाञ्चन समस्यानाम् उल्लेखः अधः क्रियते –

## असमराज्यस्थसंस्कृतशैक्षिकसमस्याः

### क. राजनैतिकक्षेत्रीयाः समस्याः

१. असमराज्ये संस्कृतस्य विकासाय उत्तमराजनेतॄणाम् अभावः वर्तते ।

२. असमराज्ये संस्कृतस्य विकासाय केन्द्रसर्वकारपक्षतः योजना न कृता ।

---

2. डा. दीपककुमारशर्मा, **"संस्कृतनिबन्धनिचयः" 2005**

3. www.kbvsasun.ac.in

३. संस्कृतस्य प्रचाराय राज्यसर्वकारस्य योजना नास्ति।

**ख. आर्थिकक्षेत्रीयाः समस्याः**

४. संस्कृताध्ययनेन धनार्जनं सन्देहास्पदम् इति जनानां भावना।

५. संस्कृतक्षेत्रे उद्योगावसराः न्यूनाः।

६. संस्कृतम् अधीत्य शिक्षकतां विना अन्यपन्थानं स्वीकर्तुं न शक्नोति।

७. संस्कृताध्येतॄणां धनं न्यूनं भवति इति जनानां चिन्तनम्।

८. प्राद्यौगिकविषयाः संस्कृते न सन्ति इति जनानां चिन्तनम्।

**ग. भाषिकक्षेत्रीयाः समस्याः**

९. संस्कृतभाषा अतीव कठिना अस्ति ।

१०. संस्कृतभाषाध्ययनस्य अपेक्षया विदेशीया भाषा उत्तमा अस्ति इति जनानां भावना।

११. संस्कृतव्याकरणं कठिनं अस्ति इति जनानां चिन्तनम्।

१२. माध्यमिकस्तरे केवलम् अङ्कप्राप्तये संस्कृतम्।

**घ. शिक्षणक्षेत्रीयाः समस्याः**

१३. संस्कृतपाठने सरलविधीनां प्रयोगः नास्ति।

१४. असमराज्यस्य पारम्परिकसंस्कृतशिक्षा उत्तमा नास्ति।

१५. असमराज्ये सर्वेषु स्तरेषु संस्कृतं संस्कृतेन न पाठ्यते।

१६. त्रिभाषासूत्रे संस्कृतस्य स्थानं नास्ति।

**ङ. शिक्षकक्षेत्रीयाः समस्याः**

१७. संस्कृतशिक्षकस्य संस्कृतशिक्षणे प्रायः न्यूना रुचिः अस्ति ।

१८. शिक्षकः संस्कृताध्ययनाय न प्रचोदयति।

१९. असमराज्ये संस्कृतशिक्षकाः अप्रशिक्षिताः सन्ति।

२०. संस्कृतशिक्षकप्रशिक्षणाय सर्वकारीयप्रयत्नः नास्ति।

**च. पाठ्यक्रमक्षेत्रीयाः समस्याः**

२१. संस्कृतस्य पाठ्यक्रमे कठिनता अस्ति।

२२. संस्कृतशैक्षिककार्यक्रमः न भवति।

२३. संस्कृतपाठ्यपुस्तकानि रुचिपूर्णानि न सन्ति।

**छ. पारिवारिकक्षेत्रीयाः समस्याः**

२४. नित्यव्यवहारे संस्कृतस्य आवश्यकता नास्ति इति जनानां चिन्तनम्।

२५. केवलम् आध्यात्मिकविकासाय एव संस्कृतम् इति जनानां चिन्तनम्।

## असमराज्यस्थसंस्कृतशैक्षिकसमस्यानां कारणानि

अत्र प्रतिक्षेत्रं प्राप्तानां समस्यानां कारणानि प्रस्तुतानि, यानि न्यादर्शदृष्ट्या जनानां साक्षात्कारेण प्रश्नावल्याः माध्यमेन सर्वेक्षणानुभवेन च प्राप्तानि।

**क. राजनैतिकक्षेत्रीयाणां समस्यानां कारणानि**

१. संस्कृतपण्डिताः सर्वकारेण सह सम्बन्धिताः न सन्ति।

२. केन्द्रसर्वकारः असमराज्ये संस्कृतस्य विकासाय उत्तमयोजना न कृता।

३. केन्द्रसर्वकारेण संस्कृतविषये कृतानां कार्याणां प्रचाराभावेन जनाः न जानन्ति।

४. असमसर्वकारः संस्कृतं प्रति आग्रहं न करोति।

५. संस्कृतच्छात्राः एकत्रीभूय सर्वकारं न प्रचोदयन्ति।

६. संस्कृतशिक्षकाः संस्कृतस्य स्थितिगतीनां विषये निरन्तरं सर्वकारं न सूचयन्ति।

**ख. आर्थिकक्षेत्रीयाणां समस्यानां कारणानि**

१. संस्कृतस्य विस्तृतपरिसरस्य विषये जनानां ज्ञानाभावः दृश्यते।

२. संस्कृताध्येतारः छात्राः शिक्षकताम् एव जीवनलक्ष्यत्वेन स्वीकुर्वन्ति।

३. संस्कृतशिक्षकाः संस्कृतस्य क्षेत्राणां विषये छात्रान् न प्रचोदयन्ति।

४. संस्कृतविषये जायमानानां कार्याणां विषये असमराज्यस्य छात्राणां शिक्षकाणां च ज्ञानं नास्ति।

५. संस्कृते विद्यमानानाम् उद्योगावसराणां विषये जनानां ज्ञानाभावः दृश्यते।

**ग. भाषिकक्षेत्रीयाणां समस्यानां कारणानि**

१. असमराज्यस्य संस्कृतपाठ्यपुस्तकानि सरलानि न सन्ति।

२. असमराज्यस्य पाठ्यपुस्तकेषु अनुवादस्य प्राधान्यम् अस्ति।

३. भाषापाठनदृष्ट्या पुस्तकानि न रचितानि, केवलं विषयपाठनदृष्ट्या रचितानि।

४. संस्कृतव्याकरणशिक्षणपद्धतेः ज्ञानं शिक्षकाणां प्रायेण नास्ति।

५. शिक्षकाणाम् आगमन-निगमनविध्योः ज्ञानं नास्ति।

६. माध्यमिकस्तरे शिक्षकाः केवलम् अङ्कप्राप्तये एव संस्कृतं पाठयन्ति।

७. माध्यमिकस्तरे शिक्षकाः संस्कृतस्य महत्त्वं छात्रान् न वदन्ति।

**घ. शिक्षणक्षेत्रीयाणां समस्यानां कारणानि**

१. असमराज्यस्य संस्कृतशिक्षकाणां संस्कृतपाठनविधीनां ज्ञानाभावः अस्ति।

२. पारम्परिकसंस्कृतशिक्षकाः संस्कृतस्य प्रसाराय प्रचाराय च प्रयासं न कुर्वन्ति।

३. पारम्परिकसंस्कृतशिक्षायां छात्राभावः अस्ति।

४. असमराज्यस्य संस्कृतशिक्षकाणां संस्कृतस्य व्यवहारिकज्ञानाभावः दृश्यते।

५. असमराज्यस्य संस्कृतशिक्षकाणां प्रशिक्षणाभावः दृश्यते।

६. असमराज्ये प्रचलितानाम् अधिकभाषाणां कारणात् त्रिभाषासूत्रे संस्कृतस्य स्थानं नैव दृश्यते।

**ङ. शिक्षकक्षेत्रीयाणां समस्यानां कारणानि**

१. संस्कृतशिक्षकाणां मानसिकहीनमन्यता अस्ति।

२. संस्कृतशिक्षकाणां भाषाज्ञानाभावः दृश्यते।

३. अधिकतया संस्कृतशिक्षकाः अन्यकार्येषु रताः अस्ति।

४. संस्कृतस्य विशालपरिसरस्य विषये संस्कृतशिक्षकाणां ज्ञानाभावः दृश्यते।

५. संस्कृतशिक्षकाणां प्रशिक्षणस्य व्यवस्था नैव अस्ति।

६. संस्कृतविषये संस्कृतमाध्यमेन संस्कृतशिक्षकाणां प्रशिक्षणसंस्था असमराज्ये नैव अस्ति।

**च. पाठ्यक्रमक्षेत्रीयाणां समस्यानां कारणानि**

१. संस्कृतपाठ्यक्रमनिर्माणे शिक्षाशास्त्रीयजनानाम् अभावः दृश्यते।

२. संस्कृतपाठ्यपुस्तकानि मनोविज्ञानदृष्ट्या न रचितानि।

३. पुस्तकेषु अनुवादपद्धतेः आश्रयः दृश्यते।

४. संस्कृतपाठ्यपुस्तकेषु प्रायोगिकपाठानाम् अभावः दृश्यते।

५. माध्यमिकस्तरे संस्कृतपाठ्यपुस्तकेषु चित्राणाम् अभावः दृश्यते।

**छ. पारिवारिकक्षेत्रीयाणां समस्यानां कारणानि**

१. संस्कृतज्ञाः सामाजिकान् संस्कृतविषये न बोधयन्ति।

२. संस्कृते विद्यमानानाम् उत्तमविचाराणां प्रचारः नैव दृश्यते।

३. धनमूलम् इदं जगत् इति जनानां चिन्तनम् अस्ति ।

४. संस्कृते विद्यमानानां नैतिकमूल्यानां समाजे प्रचारः नैव अस्ति ।

५. पारिवारिकविषये संस्कृतभाषायां विद्यमानानां ग्रन्थानाम् अध्ययनं नैव दृश्यते ।

## असमराज्यस्थसंस्कृतशैक्षिकसमस्यानां समाधानोपायाः

अत्र अनुसन्धानेन प्राप्तानां समस्यानां कारणानाम् आधारेण न्यादर्शदृष्ट्या जनानां साक्षात्कारेण सर्वेक्षणानुभवेन च समस्यानां समाधानोपायाः प्रदत्ताः ।

### क. राजनैतिकक्षेत्रीयाणां समस्यानां समाधानोपायाः

१. संस्कृतशिक्षकाः एकत्रीभूय संस्कृतस्य महत्त्वानि प्रदर्श्य प्रतिस्थानं सम्मेलनस्य व्यवस्थां कुर्युः ।

२. सम्मेलने राजनेतॄणाम् अपि आह्वानं प्रतिस्थानं भवेत् ।

३. संस्कृतच्छात्राणां समूहः (ये विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च पठन्ति) ते एकत्रीभूय सार्वजनिकस्थानेषु स्वप्रतिभां प्रदर्शयेयुः ।

४. प्रत्येकम् अपि संस्कृतच्छात्रः सर्वकारेण संस्कृतविषये कृतायाः योजनायाः प्रचारं कुर्यात् ।

५. संस्कृतानुरागिणः संस्कृतच्छात्राः अपि च राजनीतिं प्रविशेयुः ।

६. सर्वे अपि संस्कृतानुरागिणः न्यूनातिन्यूनं सर्वकारस्य कृते एकं पत्रं संस्कृतविषये लिखेयुः ।

### ख. आर्थिकक्षेत्रीयाणां समस्यानां समाधानोपायाः

१. संस्कृतशिक्षकाः संस्कृतस्य विस्तृतपरिसरस्य विषये जनान् बोधयेयुः ।

२. संस्कृतच्छात्राः संस्कृतं केवलं शिक्षकवृत्यर्थं न स्वीकुर्युः ।

३. वित्तकोषवृत्तये, विज्ञानक्षेत्रे, प्रशासनिकक्षेत्रे अपि च सर्वेषु वृत्तिषु अन्यच्छात्राणां समानतया गच्छेयुः ।

४. संस्कृतच्छात्राः संस्कृते विद्यमानानि वैज्ञानिकतत्त्वानि अवगच्छेयुः ।

५. प्रत्येकम् अपि संस्कृतशिक्षकः छात्रेभ्यः संस्कृतविषयकाः सूचनाः दद्यात् ।

६. आयुर्वेदक्षेत्रे, ज्योतिर्विज्ञानक्षेत्रे, भारतीयविज्ञानक्षेत्रे, भारतीयशिक्षाव्यवस्थायां च संस्कृतच्छात्राणाम् उद्योगावसरान् सर्वे अपि शिक्षकाः जानीयुः ।

७. उपर्युक्तानाम् उद्योगावसराणां विषये प्रत्येकम् अपि शिक्षकः छात्रान् सामाजिकजनान् च बोधयेत् ।

### ग. भाषिकक्षेत्रीयाणां समस्यानां समाधानोपायाः

१. पाठ्यपुस्तकेषु अनुवादपद्धतिं त्यक्त्वा प्रत्यक्षपद्धतिं स्वीकुर्यात् ।

२. भाषापाठनदृष्ट्या पुस्तकानि रचनीयानि ।

३. संस्कृतगद्यपद्यव्याकरणपाठने सरलविधीनां प्रयोगं शिक्षकाः कुर्युः ।

४. उदाहरणप्रयोगस्य माध्यमेन संस्कृतव्याकरणं पाठयेयुः ।

५. शिक्षकाः संस्कृतस्य अध्ययनस्य लाभविषये छात्रान् वदेयुः ।

६. विदेशेषु संस्कृतविषये कृतानां कार्याणां विषये छात्रान् प्रदर्शयेयुः ।

### घ. शिक्षणक्षेत्रीयाणां समस्यानां समाधानोपायाः

१. असमराज्यस्य संस्कृतशिक्षकेभ्यः संस्कृतपाठनविषये प्रशिक्षणस्य व्यवस्था करणीया ।

२. महाविद्यालयेषु विश्वविद्यालयेषु च संस्कृतसम्भाषणकक्ष्यायाः व्यवस्था स्यात् ।

३. पारम्परिकसंस्कृतशिक्षासंस्थासु आधुनिकविषयाणां पाठनव्यवस्था करणीया ।

४. आधुनिकविद्यालयैः सदृशं पारम्परिकपाठशालासु अपि सर्वासु कक्ष्यासु पाठनव्यवस्था करणीया ।

५. पारम्परिकसंस्कृतशिक्षासंस्थासु शतस्य अङ्कानां कृते संस्कृतम् अनिवार्यं कृत्वा अन्ये विषयाः आधुनिकविद्यालयैः सदृशाः भवेयुः ।

६. आधुनिकविद्यालयेषु मातृभाषया अथवा राष्ट्रभाषया सह पञ्चविंशतेः अङ्कानां कृते अनिवार्यतया संस्कृतपाठनस्य व्यवस्था करणीया, अपि च आधुनिकविद्यालयेषु शतस्य अङ्कानां कृते ऐच्छिकरूपेण सर्वेषु विद्यालयेषु व्यवस्था करणीया।

७. संस्कृतशिक्षकेभ्यः सूचना दातव्या यत् संस्कृतमाध्यमेन एव ते पाठयेयुः।

**ङ. शिक्षकक्षेत्रीयाणां समस्यानां समाधानोपायाः**

१. संस्कृतशिक्षकाः संस्कृतं प्रकृतरूपेण अवगन्तुं प्रयत्नं कुर्युः।

२. संस्कृतच्छात्राः एकत्रीभूय प्रशिक्षणसंस्थायाः आवश्यकतायाः विषये सर्वकारं मिलेयुः।

३. संस्कृतच्छात्राः संस्कृतेन सम्भाषणं कुर्युः।

**च. पाठ्यक्रमक्षेत्रीयाणां समस्यानां समाधानोपायाः**

१ संस्कृतपाठ्यक्रमस्य निर्माणे संस्कृतज्ञैः सह शिक्षाशास्त्रीयजनाः अपि भवेयुः।

२ संस्कृतपाठ्यक्रमः शिशोः सर्वाङ्गीणविकासाय आधारभूतः भवेत्।

३ यावत् शक्यं पुस्तकेषु अनुवादपद्धतेः निवारणं वरम्।

४ संस्कृतपाठ्यपुस्तकानि मनोविज्ञानदृष्ट्या रचितानि भवेयुः।

५ प्रत्यक्षपद्धतिम् आश्रित्य चित्राणां संयोजनेन पुस्तकानि रचयेयुः।

६ भाषाशिक्षणाय अधिकं महत्त्वं दद्यात्।

**छ. पारिवारिकक्षेत्रीयाणां समस्यानां समाधानोपायाः**

१. संस्कृतज्ञाः सामाजिकैः सह मिलेयुः तान् बोधयेयुः।

२. संस्कृते विद्यमानानां नैतिकमूल्यानां समाजे प्रचारः भवेत्।

३. पारिवारिकविषये संस्कृतभाषायां विद्यमानां ग्रन्थानाम् अध्ययनं भवेत्।

४. संस्कृताध्ययनेन धनेन सह ज्ञानम् अपि मिलति इति प्रत्यक्षेण संस्कृतज्ञाः प्रदर्शयेयुः।

५. संस्कृतेन आध्यात्मिकशान्तिः मिलति, यत् पारिवारिकक्षेत्रे प्रधानं भवति, एतत् संस्कृतज्ञाः जनान् बोधयेयुः।

## परामर्शाः

**क. संस्कृतशिक्षकेभ्यः परामर्शाः**

१. संस्कृतशिक्षकाः संस्कृतभाषाज्ञानं समीचीनतया सम्पादयेयुः।

२. संस्कृतशिक्षकाः राज्यात् बहिः गत्वा अपि प्रशिक्षणं स्वीकुर्युः।

३. संस्कृतशिक्षकाः संस्कृतवृत्तेः अवसरस्य ज्ञानं प्राप्नुयुः।

४. संस्कृतशिक्षकाः छात्रान् संस्कृतं पठितुं प्रेरयेयुः।

५. संस्कृतशिक्षकाः छात्रैः सह समाजं गत्वा सामाजिकान् मिलेयुः।

६. संस्कृतशिक्षकाः संस्कृते विद्यमानान् उत्तमविषयान् सर्वत्र प्रचारयेयुः।

७. संस्कृतशिक्षकाः मनोवैज्ञानिकपद्धत्या पाठयेयुः।

८. संस्कृतशिक्षकाः प्रतिदिनं शास्त्राध्ययनं कुर्युः।

९. संस्कृतशिक्षकाः संस्कृतस्य प्रसाराय कार्यं कुर्युः।

१०. संस्कृतशिक्षकाः संस्कृतभाषामाध्यमेन पाठयेयुः

११. संस्कृतशिक्षकाः सर्वकारं संस्कृतस्य स्थितिं ज्ञापयेयुः।

**ख. अन्यशिक्षकेभ्यः परामर्शाः**

१. संस्कृत्या सह संस्कृतस्य सम्बन्धविषये जनान् छात्रान् च बोधयेयुः।

२. संस्कृते विद्यमानं ज्ञानं स्वयम् अपि प्राप्नुयुः।
३. संस्कृतशिक्षकेभ्यः छात्रेभ्यः च प्रेरणां दद्युः।
४. संस्कृतभाषायाः उपरि निष्ठा स्यात्।

**ग. छात्रेभ्यः परामर्शाः**

१. सर्वेऽपि छात्राः संस्कृतस्य महत्त्वं ज्ञातुं प्रयत्नं कुर्युः।
२. संस्कृतच्छात्राः संस्कृतमाध्यमेन सम्भाषणं कुर्युः।
३. संस्कृतच्छात्राः अनुवादपद्धतिं त्यजेयुः।
४. छात्राः केवलम् अङ्कप्राप्तये संस्कृतं न स्वीकुर्युः, ज्ञानप्राप्तये अपि स्वीकुर्युः।
५. संस्कृतम् अधीत्य शिक्षकतया सह अन्यस्मिन् विषये अपि उद्योगं कर्तुं प्रयत्नं कुर्युः।
६. छात्राः संस्कृतभाषया सह आङ्ग्लस्य तथा हिन्दीभाषायाः अपि ज्ञानं स्वीकुर्युः।
७. छात्राणां संस्कृतव्याकरणज्ञानं स्पष्टतया भवेत्।
८. छात्राः स्वगृहजनान् अपि संस्कृतभाषायाः महत्त्वविषये वदेयुः।

**घ. सामाजिकजनेभ्यः परामर्शः**

१. संस्कृतं पठितुं प्रयत्नं कुर्युः।
२. जीवनस्य किञ्चित् कालं यावत् संस्कृतस्य प्रसाराय कार्यं कुर्युः।
३. संस्कृते विद्यमानानां सामाजिकविषयाणां पारिवारिकविषयाणां च अध्ययनं कुर्युः।
४. स्वगृहसदस्यान् संस्कृतं पठितुं प्रेरयेयुः।
५. संस्कृतं केवलं ब्राह्मणानां तथा च पूजार्थम् इति भावनां त्यजेयुः।
६. भारतीयसंस्कृत्या सह संस्कृतं निश्चयेन योजयेयुः।
७. संस्कृतभाषा निर्दिष्टस्य कस्यापि भाषा नास्ति, एषा सर्वेषां भाषा इति जानीयुः।

**ङ. सर्वकाराय परामर्शः**

१. सर्वकारः संस्कृतस्य महत्त्वम् अवगच्छेत्।
२. संस्कृतम् अपि आधुनिकभारतीयभाषात्वेन अङ्गीकुर्यात्।
३. संस्कृतपाठने धार्मिकसामाजिकबाधाः न सन्ति इति जानीयात्।
४. संस्कृतं पठितुं छात्रान् प्रेरयेत्।
५. संस्कृतशिक्षाणां प्रशिक्षणव्यवस्थां कुर्यात्।
६. विद्यालयेषु संस्कृतशिक्षकाणां नियुक्तिं कुर्यात्।
७. संस्कृतपाठ्यपुस्तकानां निर्माणस्य दायित्वं शिक्षाशास्त्रिजनेभ्यः दद्यात्।
८. उत्तमेभ्यः संस्कृतशिक्षकेभ्यः पुरस्कारं दद्यात्।
९. संस्कृते उत्तमाङ्कप्राप्तेभ्यः पुरस्कारं दद्यात्।
१०. संस्कृतमहाविद्यालयानां स्थापनं कुर्यात्।
११. सर्वस्मिन् विद्यालये महाविद्यालये विश्वविद्यालये च संस्कृतस्य अध्ययनस्य व्यवस्थां कुर्यात्।

## पारम्परीक-टोलीयशैक्षिकसमस्यानां निवारणाय सर्वकाराय परामर्शाः

१. 'संस्कृतटोल' इति नाम परिवर्त्य संस्कृतपाठशाला इति नामकरणं कुर्यात्।
२. षष्ठकक्ष्यातः नामाङ्कनं कुर्यात्।
३. षष्ठकक्ष्यातः अष्टमकक्ष्यापर्यन्तं संस्कृतस्य एकं पत्रम् अनिवार्यं कुर्यात्।

४. नवमदशमकक्ष्ययोः एकं पत्रम् अनिवार्यं पुनः एकम् ऐच्छिकं पत्रं कुर्यात्।
५. वैदेशिकभाषात्वेन आङ्ग्लस्य अपि पाठनं भवेत्। केवलं प्रायोगिकविषयाः भवेयुः पञ्चाशतः अङ्कानां कृते। पञ्चाशतः अङ्कानां सङ्गणकशिक्षा भवेत्।
६. भारतीयेतिहासः, गणितं, विज्ञानम् इत्यादीनां पाठनम् अपि कारयेत्।
७. शारीरिकशिक्षायाः व्यवस्थां कुर्यात्। विशेषेण योगं शिक्षयेत्।
८. संस्कृतपाठशालासु पठितेभ्यः छात्रेभ्यः छात्रवृत्तेः व्यवस्थां कुर्यात्।
९. पाठशालासु उत्तमभवनव्यवस्थां कुर्यात्।
१०. प्रतिग्रामं संस्कृतपाठशालानां स्थापनां कुर्यात्।
११. संस्कृतपाठशालानां मध्यमापाठ्यक्रमं तथा च शास्त्रिपाठ्यक्रमं संस्कृतविश्वविद्यालयस्य अधीने कुर्यात्।
१२. संस्कृतं संस्कृतमाध्यमेन पाठनस्य व्यवस्थां कुर्यात्।
१३. संस्कृतपाठ्यपुस्तके नैतिक-आध्यात्मिकभाषिक-ऐतिहासिक-देशप्रेम-आधुनिक-पारिवारिक-सामाजिक-राजनैतिक-स्वास्थ्यविषयाणां सन्निवेशं कुर्यात्।
१४. अन्यभाषासु अपि एतादृशान् विषयान् स्वीकुर्यात्।
१५. शिक्षकाणां प्रशिक्षणव्यवस्थां कुर्यात्। शक्यते चेत् प्रतिषण्मासं प्रशिक्षणस्य व्यवस्थां कुर्यात्।
१६. छात्राणां मूल्याङ्कनव्यवस्थां प्रायोगिकाधारेण कुर्यात्।
१७. शिक्षकाणाम् अपि मूल्याङ्कनव्यवस्थां कुर्यात्।
१८. शिक्षकाणां मूल्याङ्कनफलाधारेण वेतनवृद्धिं कुर्यात्।
१९. शिक्षकाणां नियुक्तिम् अङ्कमाध्यमेन अकृत्वा तेषाम् अध्यापनक्षमता-विषयज्ञानाधारेण कुर्यात्।

## अध्ययनस्य निष्कर्षाः सारः च

१. अनेन अनुसन्धानेन असमराज्यस्थसंस्कृतशैक्षिकसमस्याः प्राप्ताः, याः संस्कृतशिक्षां नित्यं प्रभावयन्ति।
२. अनुसन्धात्रा स्वीकृतेषु नवसु घटकेषु सामाजिकक्षेत्रं तथा च धार्मिकक्षेत्रं संस्कृतशिक्षां न प्रभावयन्ति इति न्यादर्शानाम् अभिमतेन स्पष्टम् अभवत्।
३. अनेन अनुसन्धानेन प्रत्येकम् अपि समस्यायाः भिन्नभिन्नकारणानि प्राप्तानि, यानि संस्कृतशैक्षिकसमस्यायाः मुख्यानि भवन्ति।
४. अनेन अनुसन्धानेन असमराज्यस्थसंस्कृतशैक्षिकसमस्यानां निदानाय बहवः उपायाः लब्धाः, ये असमराज्यस्थ-संस्कृत-शैक्षिक-समस्यानां समाधानाय सहायकाः भविष्यन्ति।
५. अनेन अध्ययनेन ज्ञायते यत् संस्कृतविषये विद्यमानानाम् उद्योगावसराणां विषये असमराज्यस्थजनानां ज्ञानं नैव अस्ति, अतः अस्मिन् विषये अधिकारिणः, संस्कृतज्ञाः, संस्कृतशिक्षकाः च जनान् बोधयन्ति चेत् आर्थिकक्षेत्रसम्बन्धिसमस्यानां निदानं निश्चयेन भविष्यति।
६. अनेन अध्ययनेन ज्ञायते यत् जनाः भाषीयक्षेत्रे काठिन्यम् अनुभवन्ति, अतः पाठ्यपुस्तकनिर्माणसमये निर्मातारः यदि मनोविज्ञानदृष्ट्या तथा च छात्राणां रुचिदृष्ट्या संस्कृतपाठ्यपुस्तकानां निर्माणं कुर्वन्ति तर्हि निश्चयेन जनानां मनसः भाषीयकाठिन्यं समाप्स्यति।
७. अनेन अध्ययनेन ज्ञायते यत् असमराज्ये संस्कृतशिक्षणसमये शिक्षकाः उत्तमविधीनां प्रयोगं न कुर्वन्ति, यतः संस्कृतशिक्षणं रुचिकरं न भवति, अतः छात्राः संस्कृतशिक्षातः दूरीभवन्ति। अस्मिन् क्षेत्रे शिक्षकाः यदि प्रशिक्षणं स्वीकृत्य खण्डान्वय-दण्डान्वय-आगमन-निगमनविधीनाम् आधारेण पाठयन्ति तर्हि निश्चयेन संस्कृतशिक्षणं रुचिकरं प्रभावपूर्णं च भवितुं शक्नोति।

८. अनेन अध्ययनेन ज्ञायते यत् असमराज्यस्य संस्कृतशिक्षकाः अप्रशिक्षिताः तथा च रुचिहीनाः, अतः संस्कृतशिक्षकाणां कृते प्रशिक्षणस्य व्यवस्था क्रियते चेत् शिक्षकाः उत्साहेन पाठयितुं शक्नुवन्ति तथा च पाठनम् अपि रुचिपूर्णं भवितुं शक्यते।

९. पारिवारिकक्षेत्रस्य समस्यानां विषये अनेन अध्ययनेन ज्ञायते यत् जनाः पारिवारिकक्षेत्रे संस्कृतस्य आवश्यकतायाः विषये नैव जानन्ति अतः संस्कृतानुरागिणः, संस्कृतच्छात्राः, संस्कृतशिक्षकाः च संस्कृते विद्यमानानां पारिवारिकविषयाणां प्रचारं प्रसारं च कुर्वन्ति चेत् निश्चयेन पारिवारिकसमस्याः समाजात् अपगमिष्यन्ति।

## प्रार्थना

**एतेन कृतानुसन्धानेन यदि मार्गदर्शकाः, अनुसन्धातारः, अध्यापकाः, छात्राः, सामाजिकजनाः, सर्वकारः च संस्कृतशैक्षिकसमस्यानां निदानानि ज्ञात्वा समाधानोपायान् च प्राप्य उपायानाम् उपरि मननं कृत्वा संस्कृतशैक्षिकसमस्यानां समाधानाय प्रयत्नं कुर्वन्ति तर्हि अनुसन्धातुः एतत् अनुसन्धानं सफलतां प्राप्स्यति इति अनुसन्धाता आशास्ते। इति शिवम्॥**

**(एषः शोधसारांशः "असमराज्यस्थसंस्कृतशैक्षिकसमस्यानां निदानात्मकम् अध्ययनम्" इति विषयकस्य शोधस्य अस्ति। एतत् अनुसन्धानं विद्यावारिधेः उपाधेः कृते राष्ट्रियसंस्कृतविद्यापीठस्य अधीने २०१४ - २०१७ वर्षमध्ये कृतम्।)**

## सहायकग्रन्थसूचिः

1. डा. दीपककुमारशर्मा, **"संस्कृतनिबन्धनिचयः" 2005**
2. **"संस्कृतपाठचयनम्"** 2013 एकादशद्वादशकक्ष्ययोः, असमोच्चतर-माध्यमिकशिक्षासंसद्, असमसर्वकारः
3. Report of the Secondary Education Commission, Government of India, Ministry of Education, India, 1955.
4. Assamese Wikipedia.org
5. Report of the Sanskrit Commission, 1956-1957
6. National Curriculum Frame Work – NCERT, 2005
7. Teacher Education Curriculum A Frame Work – NCERT, 2009
8. SEMIS Report about Assam. Govt. of India 2010-2011
9. Vision and Road Map for the Development of Samskrit. Ten years perspective plane. MHRD, govt. of India. 2015

**पत्रिकाः**

१. संस्कृतशिक्षणसमस्याः, अगस्ट 2003, राष्ट्रियसंस्कृतविद्यापीठम्, राष्ट्रियसंगोष्ठ्याः शोधपत्रिका।
२. दर्शन (शिक्षा क्षेत्र की चुनौतियाँ) 2010, भारतीयशिक्षण मण्डल।
३. सम्भाषणसन्देशः, नवम्बर – 2015, मार्च – 2016 संस्कृतभारती।
४. मध्यमा, प्रथमप्रकाशनम्, 2016, संस्कृतभारती, मध्यभारतम्।

**वार्तापत्रिका**

**१. The Times of India,** Saturday, November 29, 2014, Kids vote for German, Not Sanskrit.

**उपकरणानि**

१. प्रश्नावली

२. साक्षात्कारः